# आदित्य हृदयम्

ध्यानम्
नमस्सवित्रे जगदेक चक्षुसे
जगत्प्रसूति स्थिति नाशहेतवे
त्रयीमयाय त्रिगुणात्म धारिणे
विरिञ्चि नारायण शङ्करात्मने

ततो युद्ध परिश्रान्तं समरे चिन्तया स्थितम् ।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥ 1 ॥

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।
उपगम्या ब्रवीद्रामम् अगस्त्यो भगवान् ऋषिः ॥ 2 ॥

राम राम महाबाहो शृणु गुह्यं सनातनम् ।
येन सर्वानरीन् वत्स समरे विजयिष्यसि ॥ 3 ॥

आदित्य हृदयं पुण्यं सर्वशत्रु विनाशनम् ।
जयावहं जपेन्नित्यम् अक्षय्यं परमं शिवम् ॥ 4 ॥

सर्वमङ्गल माङ्गल्यं सर्व पाप प्रणाशनम् ।
चिन्ताशोक प्रशमनम् आयुर्वर्धन मुत्तमम् ॥ 5 ॥

रश्मिमन्तं समुद्यन्तं देवासुर नमस्कृतम् ।

पूजयस्व विवस्वन्तं भास्करं भुवनॆश्वरम् ॥ 6 ॥

सर्वदॆवात्मकॊ ह्यॆष तॆजस्वी रश्मिभावनः ।
ऎष दॆवासुर गणान् लॊकान् पाति गभस्तिभिः ॥ 7 ॥

ऎष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः ।
महॆन्द्रॊ धनदः कालॊ यमः सॊमॊ ह्यपां पतिः ॥ 8 ॥

पितरॊ वसवः साध्या ह्यश्विनौ मरुतॊ मनुः ।
वायुर्वह्निः प्रजाप्राणः ऋतुकर्ता प्रभाकरः ॥ 9 ॥

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ।
सुवर्णसदृशॊ भानुः हिरण्यरॆता दिवाकरः ॥ 10 ॥

हरिदश्वः सहस्रार्चिः सप्तसप्ति-र्मरीचिमान् ।
तिमिरॊन्मथनः शम्भुः त्वष्टा मार्ताण्डकॊऽंशुमान् ॥ 11 ॥

हिरण्यगर्भः शिशिरः तपनॊ भास्करॊ रविः ।
अग्निगर्भॊऽदितॆः पुत्रः शङ्खः शिशिरनाशनः ॥ 12 ॥

व्यॊमनाथ स्तमॊभॆदी ऋग्यजुःसाम-पारगः ।
घनावृष्टि रपां मित्रॊ विन्ध्यवीथी प्लवङ्गमः ॥ 13 ॥

आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः ।
कविर्विश्वॊ महातॆजा रक्तः सर्वभवॊद्भवः ॥ 14 ॥

नक्षत्र ग्रह ताराणाम् अधिपॊ विश्वभावनः ।
तॆजसामपि तॆजस्वी द्वादशात्मन्-नमॊऽस्तु तॆ ॥ 15 ॥

नमः पूर्वाय गिरयॆ पश्चिमायाद्रयॆ नमः ।
ज्यॊतिर्गणानां पतयॆ दिनाधिपतयॆ नमः ॥ 16 ॥

जयाय जयभद्राय हर्यश्वाय नमॊ नमः ।
नमॊ नमः सहस्रांशॊ आदित्याय नमॊ नमः ॥ 17 ॥

नम उग्राय वीराय सारङ्गाय नमॊ नमः ।
नमः पद्मप्रबॊधाय मार्ताण्डाय नमॊ नमः ॥ 18 ॥

ब्रह्मॆशानाच्युतॆशाय सूर्यायादित्य-वर्चसॆ ।
भास्वतॆ सर्वभक्षाय रौद्राय वपुषॆ नमः ॥ 19 ॥

तमॊघ्नाय हिमघ्नाय शत्रुघ्नाया मितात्मनॆ ।
कृतघ्नघ्नाय दॆवाय ज्यॊतिषां पतयॆ नमः ॥ 20 ॥

तप्त चामीकराभाय वह्नयॆ विश्वकर्मणॆ ।
नमस्तमॊऽभि निघ्नाय रुचयॆ लॊकसाक्षिणॆ ॥ 21 ॥

नाशयत्यॆष वै भूतं तदॆव सृजति प्रभुः ।
पायत्यॆष तपत्यॆष वर्षत्यॆष गभस्तिभिः ॥ 22 ॥

ऎष सुप्तॆषु जागर्ति भूतॆषु परिनिष्ठितः ।
ऎष ऎवाग्निहॊत्रं च फलं चैवाग्नि हॊत्रिणाम् ॥ 23 ॥

वॆदाश्च क्रतवश्चैव क्रतूनां फलमॆव च ।
यानि कृत्यानि लॊकॆषु सर्व ऎष रविः प्रभुः ॥ 24 ॥

**फलश्रुतिः**

ऎन मापत्सु कृच्छ्रॆषु कान्तारॆषु भयॆषु च ।
कीर्तयन् पुरुषः कश्चिन्-नावशीदति राघव ॥ 25 ॥

पूजयस्वैन मॆकाग्रॊ दॆवदॆवं जगत्पतिम् ।
ऎतत् त्रिगुणितं जप्त्वा युद्धॆषु विजयिष्यसि ॥ 26 ॥

अस्मिन् क्षणॆ महाबाहॊ रावणं त्वं वधिष्यसि ।
ऎवमुक्त्वा तदागस्त्यॊ जगाम च यथागतम् ॥ 27 ॥

ऎतच्छ्रुत्वा महातॆजाः नष्टशॊकॊऽभवत्-तदा ।
धारयामास सुप्रीतॊ राघवः प्रयतात्मवान् ॥ 28 ॥

आदित्यं प्रॆक्ष्य जप्त्वा तु परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥ 29 ॥

रावणं प्रॆक्ष्य हृष्टात्मा युद्धाय समुपागमत् ।
सर्वयत्नॆन महता वधॆ तस्य धृतॊऽभवत् ॥ 30 ॥

अध रविरवदन्-निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः ।
निशिचरपति सङ्क्षयं विदित्वा सुरगण मध्यगतो वचस्त्वरेति ॥ 31 ॥

इत्यार्षे श्रीमद्रामायणे वाल्मिकीये आदिकाव्ये युद्दकाण्डे पञ्चाधिक शततम सर्गः ॥